INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(6), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

# महाभारत मूलानुवादयोः मुख्यरस,अलङ्कार भेदाः

**KOTESWARA RAO. DASARI**
Research Scholar
Dept.of Sanskrit
Andhra University
Visakhapatnam, A.P

## भारतशब्दार्थः

भरतो नाम चन्द्रवंशजः कश्चन राजा। अयं शकुन्तलदुष्यन्तयोः पुत्रः एवेति सर्वेषां विश्वासः। भरतवंशजाः योद्धारः भरताः। भरताः योद्धारः अस्य संग्रामस्य भारतः इति भारतशब्दार्थः "संग्रामे प्रयोजनयोधृभ्यः" इति सूत्रव्याख्या अवसरे वैय्याकरणैः एव निरूपितम्। तं संग्रामं अधिकृत्य कृतो ग्रन्थः भारतम् इति ग्रन्थपक्षे भारशब्दार्थः। तदेव भारतं क्रमेण वेदव्यासेन एव परिवर्धितम्। षष्ठिलक्षश्लोकात्मिके अन्यरूपे भारतग्रन्थे लक्ष्यात्मकश्लोकभागः भूलोकस्य अंशो भवतीति कथा महाभारते एव दृश्यते। प्रथमं वेदव्यासः चतुर्विंशति साहस्रीं (24000) भारतसंहितां कृतवान्। ततोऽर्धशतंसहस्रं उपाख्यानैः पूरितम्। ततः मूलकथा षड्विंशतिसहस्र श्लोकात्मिका इति लक्षश्लोकात्मकं महाभारतम्।[1] शान्तिपर्वणि मोक्षधर्मपर्वणः शमप्रतिपादकत्वेऽपि अनुवादे मूलेस्थिताः शान्तरस प्राधान्यप्रतिपादकाः नानूदिताः। रुक्मिणी प्रभृतीनां परमात्मनि लीनत्वं रुक्मिण्याः लक्ष्मीत्व प्राप्तिः युधिष्ठिरस्य नरकदर्शनान्तरं स्वर्गप्राप्तिः इत्येतावद्भिः एव विषयैः अनुवाद समाप्तिः कृता। अध्यायत्रयात्मके फलश्रुतिमात्रमनूदिता। धर्मो न त्याज्यः इति विषये गृहीतेऽपि "जीवोनित्यः हेतुरस्यत्वनित्यः।"[2]

जीवः = जीवात्मा, अनित्य = जीवकारणं देहः देहस्यानित्यत्वं आन्ध्रमहाभारतान्ते नानूदितम्। स्वर्गारोहणपर्वणि एकाशीतितमे वचने आन्ध्रमहाभारतरचनप्रयोजनं एवं उपवर्णितम्। त्रिभिः वर्षैः सदोत्थायै वेदव्यासः पाण्डवयशः प्रकाशनार्थं राज्ञां चरित्र द्योतनार्थं वासुदेवलीलानिरूपणार्थं देवजातीनां उत्पत्तिनिरूपणार्थं सकलधर्मनिरूपणार्थमेव आन्ध्रमहाभारतं

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(6), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

कृतवानिति रचनप्रयोजनस्य संस्कृतमहाभारतात् भिन्नतया वर्णितमिति आन्ध्रमहाभारते धर्मवीरस्य प्राधान्यं सिद्धमिति विदुषां मतमवगन्तव्यम्। धर्मवीर प्राधान्य निरूपकः संस्कृतगद्यरूपः आन्ध्रगद्यनिरूपणं यथायदं उदाह्रीयते।

**వ. పాండవుల కీర్తింబ్రకటించుటకును మఱియుం గొందఱు జనపతుల చరిత్రంబులు జనుల కెఱింగించుటకును దేవదేవుండగు వాసుదేవుని సంక్రీడా విశేషంబులు వివరించుటకును సర్వదేవజాతుల జన్మంబులును దదీయ సాయుజ్యంబులును దేటపఱుచుటకును సకల ధర్మంబులునుం దెలుపుటకును గాఁ బంచవేదంబయి పరగునిమ్మహాభారతసంహిత యొనర్చె నిమ్మహితేతిహాసంబు సంవత్సర త్రయకృతంబు దీని విశేషంబు వినుండ.**[3]

मूलानुवादयोः अलङ्कारप्रयोगेभेदः

अलङ्कारप्रयोगे संस्कृतमहाभारतात् आन्ध्रभारते भूयान् भेदः दृश्यते। एवं विधो भेदः कवित्रयेनापि अनुसृतः। तत्र नन्नय्येन प्रयुक्तं अलङ्करप्रयोगे स्वातन्त्र्यं यथा आदिपर्वणि संस्कृतभारते समुद्रमथन समनन्तरमेव कद्रुविनताभ्यां उच्चैश्रवसः दर्शनं उपवर्णितम्। तत्र समुद्रस्य दर्शनवर्णनं न वर्तते। नन्नय्यः समुद्रदर्शनवर्णनं सालङ्कारं स्वतन्त्रं कृतवान्।

संस्कृतभारते –

एतस्मिन्नेव काले तु भगिन्यौ ते तपोधन।
अपश्यतां समायाते उच्चैः श्रवसमन्तिकात्।।
यं तं देवगणाः सर्वे हृष्टरूपमपूजयन्।
मथ्यमनेऽमृते जातमश्वरत्नमनुत्तमम्।।[4]

किन्तु महाभारते एकस्मिन् प्रकाशने उच्चैश्रवसः दर्शनान्तरं प्रातः पुनर्दर्शनसमये समुद्रवर्णनं दशभिः श्लोकैः कृतं दृश्यते।[5] गोरख् पूर् प्रकाशं श्लोकाश्च कथापरिवृत्तभागे उदाहृताः।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:4(6), April:2021
Online Copy Available: www.ijmer.in
Digital certificate of publication:http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf

नन्नय्येन उपमोत्प्रेक्षालङ्कारमिश्रणेन समुद्रवर्णनं कृतम्। उद्यानवनमिव बहुविद्रुमलतालङ्कृतं नाटकप्रयोगः इव घनरसपात्रशोभितरङ्गरम्यं दिवसः इव अहिमकरभरितमिति त्रयोपमालङ्काराः श्लेषोत्थापिताः तत्र प्रयुक्ताः।

**వ. కద్రువయు, వినతయు వినోదార్థంబు విహరించువారు కరిమకరనికరా ఘాతజాత వాతోద్ధూత తుంగతరంగాగ్ర సముచ్ఛలజ్జలకణాసారచ్ఛటాచ్ఛాదిత గగన తలంబైనదాని, నుద్యానవనంబునుంబోలె బహువిద్రుమ లతాలంకృతబైనదాని, నాటక ప్రయోగంబునుంబోలె ఘనరసపాత్ర శోభితరంగరమ్యంబైనదాని, దివంబునుంబోలె నహిమకర భరితంబైనదాని మఱియు.**[6]

आन्ध्रवचने प्रयुक्ताः त्रयोऽपि उपमालङ्काराः संस्कृतभाषायां सिद्धसमासाः '**పోలె**' इति इवार्थकः आन्ध्रशब्दः।

समुद्रः –उद्यानवनमिव रम्यः इति सादृश्यम्। सधर्मस्तु बहुविद्रुमलतालङ्कृतत्वम्।

उद्यानपक्षे- बहुभिः विशेषरूपैः द्रुमैः लताभिश्च अलङ्कृतम्।

समुद्रपक्षे – विद्रुमः मणिविशेषः '**పగడం**' इत्यान्ध्रभाषायायां समुद्रे विद्रुमलतानां स्थिति प्रसिद्धा एव।

नाटकप्रयोगसादृश्यं समुद्रस्य

घन –महता रस- जलेन पूर्ण-व्याप्त तरङ्ग – तरङ्गैः रम्यम्।

नाटकपक्षे – घन – सम्पूर्ण, रस-श्रृङ्गारादिरस, पूर्ण-व्याप्तत्वात्, शोभिता-प्रकाशमान, रङ्ग-रङ्गस्थलेन रम्यम्-सुन्दरं इत्यर्थः।

समुद्रपक्षे

अहिभिः = सर्पैः, मकरैः = ग्राहैः, भरितं = आक्रन्तम्

दिवापक्षे – अहिमकरः – सूर्यः तेन भरितं इत्यर्थः।

एवं स्वतन्त्रः अलङ्कारप्रयोगः नन्नय्येन बहुषु स्थलेषुकृतः। अनेन एव वर्णनप्रयोगोऽपि गतार्थः।

तिक्कन्नः अपि मूलमहाभारते अदृष्टान् अपि अलङ्कारान् बहुधा प्रयुक्तवान्। विराटपर्वणि सूर्योदयवर्णने वर्णनविशेषाः अनेके अलङ्काराश्च मूलातिरिक्ताः दृष्टाः। तथैव आनुशासनिकपर्वणि गरुत्मतः वृत्तान्तवर्णने बहवो अलङ्काराः अमूलकाः प्रयुक्ताः। यर्रन्नः अपि अरण्यपर्वणि किरातार्जुनीयकथायां मूले अदृष्टान् बहून् अलङ्कारान् प्रयुक्तवान्। शरद्वर्णनं च अमूलकमेव प्रकृतशोधनिबन्धविषयः कथा परिवृत्तिरिवेति एते विषयाः विस्तरेण नोदाहृताः। नन्नय्यभट्टारकः अनुवादवाङ्मये स्वातन्त्र्यं अवलम्ब्य महाभारतानुवादं स्वतन्त्रकाव्यरूपेण कृतवान्। तिक्कन्नः अपि स्वभारतानुवादं “प्रबन्धमण्डलिः” इत्युदाजहार। स्वतन्त्राणां अनेकेषां प्रबन्धानां (काव्यानां ) समूहः इत्यर्थः। यर्रन्नस्य प्रबन्धपरमेश्वर बिरुमेव तस्य काव्यनिर्माणे स्वातन्त्र्यं द्योतयति।

कवित्रय दर्शितमार्गमनुसृत्य अनन्तरं श्रीनाथः बोम्मेरपोतन्नः इत्यादयोऽपि स्वानुवादान् स्वतन्त्रप्रबन्धतुल्यानेव चक्रुः। महाभारते सर्वासां कथानां प्रत्यंशं सूक्ष्मेक्षकया समग्रतया अनुशीलनं दोर्भ्यां समुद्रस्य तितीर्षणं भवतीति यथामति यत्नः क्रियते। पर्वणां क्रमेण अत्र कथानुवृत्तेः परिशीलनं कृतम्। यानि वर्णनानि अपि कथा भागद्वये दृष्टानि तान्यपि यथासम्भवं उदाह्रीयन्ते

## उद्धरणानिः

1. महा.भा,आ.प्र.श्लो-101 तः 105,नीलकण्ठीयव्याख्य
2. महा.स्वर्गा, अ-5, श्लो-63
3. आ.भा.स्वर्गा.प्र.वचनम् -81,पृ-399
4. महा.आ.अ-17,श्लो-1,2,नीलकण्ठीयम्
5. महा.आ.अ-21,श्लो–1 तः 10,पृ-126
6. आ.भा,आ,द्वि.गद्य-27,पृ-112

## उपयुक्तगिरन्थसूची

1. Mahabharatam, commentary of Nilakanta, chitrasala press, poona, 1929

3. Andhra Mahabharata - T.T.D.Publication, Tirupati, 2013

4. The Mahabharata of Vyasa - Mohan Ganguli, 1883 - 1886

| | |
|---|---|
| Filename: | 6 |
| Directory: | C:\Users\DELL\Documents |
| Template: | C:\Users\DELL\AppData\Roaming\Microsoft\Templates\Normal.dotm |
| Title: | |
| Subject: | |
| Author: | Windows User |
| Keywords: | |
| Comments: | |
| Creation Date: | 4/16/2021 4:41:00 PM |
| Change Number: | 5 |
| Last Saved On: | 5/5/2021 5:27:00 PM |
| Last Saved By: | Murali Korada |
| Total Editing Time: | 16 Minutes |
| Last Printed On: | 5/6/2021 2:29:00 PM |

As of Last Complete Printing

- Number of Pages: 4
- Number of Words: 0 (approx.)
- Number of Characters: 4 (approx.)